प्रारम्भाब्दः १९६४ ई. तः

दीपेश विनोद कतिरा

ISSN 2348 9847

वर्षम् - ५३

# सुरभारती

अङ्कः ५३

## वार्षिकी शोधपत्रिका

२०१६-१७

प्रधानसम्पादकः

प्रो. के. कृष्णन्

सम्पादकदमण्डलम्

डॉ. हरिप्रसादः पाण्डेयः डॉ. रामपालः शुक्लः
श्री सुरेशः पटेलः डॉ. कपिलदेवः शास्त्रीः
डॉ. योगेश त्रिवेदी डॉ. प्रफुल्लः पुरोहितः
डॉ. चेतन पण्ड्या डॉ. मीरा दुबे
श्रीमती प्रज्ञा तन्ना कु. मन्दिरा दत्ता

THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

Estd. 1949

प्रकाशकः

पारम्परिकसंस्कृताध्ययनविभागः

बरोडा संस्कृतमहाविद्यालयः

महाराजासयाजिरावविश्वविद्यालयः, वटोदरम् ।

Scanned by CamScanner

# ।। अनुक्रमणिका ।।


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| - शुभसन्देशः कुलाधिपतिः | राजमाता शुभांगिनीराजे गायकवाड | |
| - शुभसन्देशः | श्री जिज्ञेशभाई बी. सोनी | |
| | **शोधलेखाः** | |
| १ संस्कारः | प्रो. डी. एन. पाण्डेयः | १ |
| २ महाकविमल्लिनाथविरचिते श्रीरघुवीरचरित-महाकाव्ये वाल्मीकिरामायणस्य प्रभावः | डॉ. सदानन्दत्रिपाठी 'दयालु' | ७ |
| ३ मुकुलभट्टदिशाऽभिविचारः | डॉ. ललितकुमारः पटेलः | १४ |
| ४ धर्मे ईश्वरः | डॉ. मीरा दुबे | २१ |
| ५ संस्कृतेऽनूदितस्य हयत इत्यारबीज्योतिष-ग्रन्थस्य समीक्षा | डॉ. श्यामदेवमिश्रः | ३६ |
| ६ विकल्पः विवक्षा च | डॉ. दीपेशः विनोदः कतिरा | ४४ |
| ७ धर्मशास्त्रे स्त्रीसमानतानुषङ्गतया दायभागः स्त्रीधनापरिहार्यता च | डॉ. पंकजः कृ. ठाकरः | ४८ |
| ८ जीवब्रह्मणोरभिन्नता | डॉ. शत्रघ्नः पाणिग्राही | ५५ |
| ९ वैदिकसाहित्ये पुराणशास्त्रस्य विमर्शः | डॉ. कपिलदेवः हरेकृष्णः शास्त्री | ६० |
| १० वैयाकरणानां शब्दतत्त्वम् | डॉ. अखिलेशकुमारः द्विवेदी | ६९ |
| ११ वैदिकवाङ्मये आत्मनः स्वरूपम् | डॉ. भावप्रकाशः गान्धी | ७४ |
| १२ वेदे सुवर्णविज्ञानम् | डॉ. गिरिजाप्रसादः षडङ्गी | ८२ |
| १३ अभिनवगुप्तकृतायाः व्याख्यायाः विमर्शः | डॉ. विष्णुप्रसादः टी. रावलः | ८९ |
| १४ उत्सवनोन्नतिः | डॉ.. प्रफुल्लः पुरोहितः | ९१ |
| १५ वाग्योगविद् पतञ्जलिः | श्रीविकासः शास्त्री | ९४ |
| १६ महार्थानां व्याकरणाद्वैयाकरण उच्यते | डॉ. क्षितीश्वरनाथः पाण्डेयः | ९७ |
| १७ ऋग्वेदे अद्वैततत्त्वम् | श्रीसुरेशः पटेलः | १०१ |
| १८ सिद्धहेमशब्दानुशासनगततत्त्वानां विमर्शः | डॉ. योगेशः त्रिवेदी | १०५ |
| १९ श्रीसान्दीपनिस्तोत्रम् एकमध्ययनम् | श्रीराहुलः जोशी | ११० |
| २० विश्वभाषासु संस्कृतस्य प्रदानम् | डॉ. हरिप्रसादः पाण्डेयः | ११६ |


Scanned by CamScanner

ISSN-2348 9847

# विकल्पः विवक्षा च

–डॉ. दीपेशः विनोदः कतिरा*

**सारः–**

*पत्रेऽस्मिन् योगशास्त्रे चर्चितस्य विकल्पस्य, शब्दप्रयोगहेतुभूताया व्याकरणशास्त्रे चर्चिताया विवक्षायाश्च शब्दसम्बन्धित्वादेकत्र चिन्तनं प्रवर्तितम्। अप्युभयोः शास्त्रयोः पृथक्पृथगुक्ते विकल्पविवक्षे तुल्ये? अपि वा परस्परसम्बद्धे? सम्बद्धे चेत् तयोः सम्बन्धः कीदृगित्यादिविचारोऽस्मिन् लेखे प्रवर्तितः।*

**मुख्यशब्दाः– विवक्षा, विकल्पः, शब्दः।**

**प्रस्ताविकम्–** पञ्चतयीनां वृत्तीनां विवरणकाले योगसूत्रकारेण तट्टीकाकृद्भिश्च विकल्पस्वरूपं वर्णितम्। योगे तावत् चित्तवृत्तिनिरोध इष्यते। विकल्पोऽपि चित्तवृत्तिः। अतस्तत्स्वरूपाधिजिघांसा योगे। भाषा विवक्षाधीना। तस्माद् विवक्षाविचारो वाक्यपदीये प्रवर्तितः। उभावप्येतौ विवक्षाविकल्पौ शब्दसम्बन्धिनाविति व्यक्तमेतत्। तस्माद् द्वयोः सम्बन्धजिज्ञासा, साम्यभेदजिज्ञासा चास्य लेखस्यारम्भे बीजम्।

**अथ विकल्पः—**

**वृत्तयः पञ्चतय्यः** इति योगसूत्रकारः कथयति। विषययोगात् चित्तस्य या परिणतिः सा वृत्तिः[१]। योगसूत्रकारेण विकल्पलक्षणमित्थं सूत्रितम्- '**शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः**' (योगसूत्रम्–१.९)। शब्दजन्यं ज्ञानं शब्दज्ञानम्। अनुपतितुम्–अनुसर्तुम्–अनूत्पतितुम्[२] शीलमस्य स अनुपाती। वस्तुशून्यो नाम निर्विषयः। तादृशी या चित्तवृत्तिः सा विकल्प इति सूत्रस्याशयः। '**शशशृङ्गम्**' इत्यस्य शब्दस्य श्रवणेन सममेव चित्ते या वृत्तिर्भवति सा '**विकल्प**' इति उच्यते। अस्या वृत्तेर्विषयः शशस्य शृङ्गम्। तत् चास्यां सृष्टौ न कुत्रापि विद्यते। अत एषा वृत्तिर्वस्तुशून्येत्युक्म्। इतः पूर्वं '**प्रत्यक्षानुमानागमाः प्रमाणानि**'(यो.सू.-१.७) इत्यत्रागमप्रमाणमुक्तम्। आप्तेन दृष्टोऽनुमितो वाऽर्थो येन शब्देन ह्युपदिश्यते तस्माच्च शब्दात् श्रोतुर्या तदर्थविषया वृत्तिरुदेति स आगमः[३]।

*प्राध्यापकः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी–वेरावलम् (गुज.)

१. दृश्यताम्-शर्मा(२००९:९), योगसूत्रम्-१.२ इत्यत्र पदबोधिनी।

२. इति कोल्हट्कर(२०१४:९) इत्यत्र योगसूत्रम्-१.९ इत्यस्य व्यख्या।

३. दृश्यताम्-शर्मा(२००९:२७), योगसूत्रम्-१.७ इत्यत्र पदबोधिनी।





विकल्पस्यागमेऽन्तर्भावो दुश्शकः। यत आगमप्रमाणवृत्तिराप्तद्वारा दृष्टमनुमितं वा किञ्चित् वस्तु वा वस्तुधर्मं वा विषयीकरोति। नायं तथा। विकल्पो विपर्ययादपि भिद्यते। उक्तञ्च योगसूत्रकारेण '**विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्**[४]' इति। विपर्ययः शब्दज्ञानानुपाती न भवति। पुनश्च विपर्ययः केनचित् पदार्थेन सम्बन्धो भवति। तस्यैव पदार्थस्य विषये मिथ्याज्ञानं भवति। तस्य पदार्थस्य विषये यथार्थज्ञाने जाते विपर्ययस्य बोधो भवति। ततः परं विर्ययेण न कोऽपि व्यवहारः सिध्यति। विकल्पे मिथ्याज्ञानवारणादिकं नापेक्षितम्। शब्दैः कल्पनायाः यथावदभिव्यक्तिः दैनिकव्यवहारस्य सुचारुनिर्वहणाय कल्पते। इत्थं विकल्पो वस्तुशून्योऽपि व्यवहारसाधको भवति। कालोऽपि परमार्थतया किञ्चिद्वस्त्वेव। किन्तु 'काल'-शब्दद्वारा काचित् सङ्कल्पनोच्यते– तन्नाम काचिद्वृत्तिर्जायते। सोऽयं शब्दो विद्वद्भिरपि व्यवहारनिर्वहणायासकृत्प्रयुज्यते। 'राहोः शिरः' इत्येवं शब्दे श्रुते राहुः कश्चित्, तस्यावयवः शिरोऽन्यदिति बुद्धौ वृत्तिरुदेति। वस्तुतः राहुर्नाम शिर एव। इत्थमभेदे भेदस्यारोपो जायते। यदायोगोलके स्थितोऽग्निर्दहति तदा 'अयोगलकं दहति' इत्येवोच्यते। इत्थं भेदे याभेदवृत्तिरुदेति स विकल्पः। 'पुरुषो निष्क्रियः' इत्यत्र क्रियाभावः पुरुषस्य विशेष्यतात्वेनोच्यते। नाभावो वस्तुधर्मः। तथापि विवेकिनोऽपि पुरुषा इत्थं व्यवहरन्तो लक्ष्यन्ते। 'कृष्णस्तिष्ठति' इत्यत्र गतिनिवृत्तिः, गत्यभावो वा स्थाधातोरर्थः। गतिर्वस्तुधर्मो न तु गत्यभावः। गत्यै कर्तापेक्ष्यते न तु गत्यभावाय। तथाप्यत्र कृष्णः कर्ता। तिष्ठति, स्थास्यति, अतिष्ठत् इत्यादिभिः गत्यभावाय काला अपि शब्दद्वारभिव्यज्यन्ते। इत्थं नैकविकल्पपरम्परैवात्र वाक्ये प्रदर्शयितुं शक्या।

**अथ विवक्षा :—**

डिक्शनरी ओफ संस्कृत ग्रामर इत्याख्ये कोशे विवक्षाविषय इदं लिखितम्– *"Intensin or desire, generally of the speaker with regard to the sense to conveyed by his words."* वि-उपसर्गपूर्वकात् वच- परिभाषण इत्यस्माद् धातोः सनि अप्रत्यये टापि च कृते विवक्षेति रूपं सिद्ध्यति। अस्या यौगिक एव अर्थः सर्वत्र शास्त्रेऽङ्गीक्रियते। पाणिनीयं व्याकरणं संयोजनात्मकं सर्जनात्मकं वा वर्तते, न तु विश्लेषणात्मकं पृथक्करणात्मकं वा। तस्माद् व्याकरणेऽस्मिन् विवक्षितार्थ एवारम्भबिन्दुर्वर्तते। मनसि स्थितमर्थजातं विवरितुं सर्वादौ विवक्षितार्थस्यैव विचारो भवति। ततस्तस्य प्रकटने समर्थयोः प्रकृतिप्रत्यययोश्चयनं क्रियते। ततः स्थान्यादेशध्वनिपरिवर्तनादिव्याकरणशास्त्रोपदिष्टाः प्रक्रियाः क्रियन्ते। ततः पदवाक्यसिद्धिर्जायते। पाणिनीयव्याकरणे नैकत्र सूत्रेषु विषयसप्तमीद्वारा

४. योगसूत्रम्-१.८

विवक्षितार्थस्य परामर्शः कृतो वर्तते। तद्यथा-**'वर्तमाने लट्'**[५] **'परोक्षे लिट्'**[६] **'चार्थे द्वन्द्वः'**[७] **'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'**[८] चेत्यादौ। नैकत्रार्थे परिवर्तिते सति विभक्तिपरिवर्तनं लक्ष्यते। तद्यथा **'द्वादशवर्षाणि व्याकरणमधीतम्'** इत्यत्र **'कालाध्वनोर-त्यन्तसंयोगे'**[९] इति सूत्रानुसारं द्वितीया क्रियते, किन्तु अपवर्गे विवक्षिते **'अपवर्गे तृतीया'**[१०] इति सूत्रानुसारं तृतीया क्रियते। **'नादिन्याक्रोशे पुत्रस्य'**[११] इति सूत्रं विशिष्टार्थे विवक्षिते द्वित्वस्य नियमनं करोति। **'स्वरितञितः कर्त्रभिप्राये क्रियाफले'**[१२] इति सूत्रं विशिष्टार्थविवक्षायाम् आत्मनेपद-परस्मैपद-संज्ञकयोरन्यतरं प्रत्ययं शास्ति। इत्थं पाणिनीये शब्दशास्त्रे क्षेपे, गर्हायाम्, भूषणे, पूजायाम्, अशिष्टव्यवहारे, अपह्नवे च विवक्षिते विशिष्टाः प्रत्ययाः प्रक्रियाश्च समाहृताः लक्ष्यन्ते। गोः पयोदोहनसन्दर्भे अपादानस्य विवक्षायां गोपदमपादानसंज्ञं लभते, किन्त्वपादानस्याविवक्षायां तदेव गो-पदं कर्मसंज्ञां प्राप्नोति। इत्थं विवक्षातः कारकाणि भवन्तीति प्रसिद्धमेतत्। उक्तं हरिणापि विवक्षासन्दर्भे-

**शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः।**
**सर्वदा सर्वथा भावात्क्वचित्किञ्चिद्विवक्ष्यते।।**[१३]

इतः पूर्वं 'क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः' इति हरिणोच्यते। सामर्थ्यं नाम शक्तिः। द्रव्यं शक्तिसमूहाद्भिन्नं किमपि नास्ति। आसां शक्तीनां सर्वदा सर्वथा च सद्भवो वर्तते। तासु क्वचिदेका शक्तिर्विवक्षिता भवति क्वचिच्चापरा। तनैव समानस्य द्रव्यस्य क्वचिद्वाक्ये कर्मत्वं क्वचित्करणत्वं क्वचिच्चाधिकरणत्वं विवक्ष्यते। अन्यत्राप्युक्तं **'साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धनः'**[१४] इति। सेयं बुद्ध्यवस्थैव विवक्षा।

**निर्जीवेषु पदार्थेषु कर्तृत्वशक्तिः कुतः समायाति?**

विकल्पवर्णनावसरे योगशास्त्रेऽपीयं शङ्कोत्पादिता। समाधानतयोक्तं यदियं विकल्पवृत्तिः। **'यानं याति'** इत्यादिषु वाक्येषु शब्दश्रवणमात्रेण याने कर्तृत्ववृत्तिर्जायते। वस्तुजगति यानमचेतनम्। तस्मिन् कर्तृशक्तिर्न विद्यते। कर्तृत्वशक्तियुतं यानं कल्पनामात्रम्। शब्दशास्त्रे त्वियं कल्पनैव **'बुद्ध्यवस्था'**- शब्देनोक्ता। **'यानं याति'** इत्यत्राचेतनेऽपि याने यत्कर्तृत्वं विवक्ष्यते तत्र कारणं भर्तृहरिणेत्थमुक्तम्–

५. पा. सू.३.२.१२३ ६. पा. सू.३.२.११५ ७. पा. सू.२.२.२९ ८. पा. सू.२.३.४६
९. पा. सू.२.३.५ १०. पा. सू.२.६.६ ११. पा. सू.८.४.४८ १२. पा. सू.१.३.७
१३. वाक्यपदीयम्-३.७.२ १४. वाक्यपदीयम्-३.७.३





**धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि।**
**कर्तृधर्मविवक्षायां शब्दात्कर्ता प्रतीयते।।**[१५]

अभ्युदितैर्धर्मैः (साधनविषयको) नियमः क्रियते स शब्दविषये वर्तते न तु वस्तुविषये। (प्रकृते उदाहरणे यान–) शब्देन यः कर्ता प्रतीयते तस्मिन् कर्तृधर्मविवक्षा वर्तते न तु वस्तुनि। **'अग्निः दहति'**,**'काष्ठानि पचन्ति'** इत्यादिषु वाक्येषु अग्निकाष्ठादिभिः शब्दैः गम्यमानानां पदार्थानां कर्तृसंज्ञा वर्तते न तु वास्तविकानाम् अग्निकाष्ठादीनाम्। उक्तं च पतञ्जलिनापि, **'शब्दप्रमाणका वयम्। यच्छब्द आह तदस्माकं प्रमाणम्'** इति। वाक्यपदीयटीकाकृता हेलाराजेनाप्युक्तम्– **'व्याकरणे हि शब्दार्थोऽर्थः न वस्त्वर्थः'**[१६] इति। शब्दैर्गम्यमानः पदार्थो बुद्धिस्थस्तत्त्वस्तुविषयकः संस्कारविशेषो यस्तत्तदुच्चारितबुद्धौ जागर्ति।

**विकल्पो विवक्षा च :—**

अभिहितान्वयपक्ष ईदृश्या विवक्षया संप्रेरितनाभिधात्रा यदभिधीयते तद् श्रोतुर्विकल्पवृत्तेर्जनकं भवति। अन्विताभिधनपक्षे तावदभिधातुर्मनसि दृढाः वास्तविकपदार्थसामान्यसम्बद्धाः (किन्तु केनापि विशिष्टपदार्थेनासम्बद्धाः) विकल्पजाः संस्कारा एव विवक्षाजनकाः भवन्ति। इत्थं विकल्पाद्विवक्षा विवक्षातश्च विकल्पो जायमानः सन्दृश्यते। विकल्पविवक्षयोरनादित्वात् यद्यपि तयोः परस्परं कार्यकारणभावो विद्यते तथापि बीजाङ्कुरवदन्योन्याश्रयदोषः प्रसक्तो न भवति।

**सन्दर्भग्रन्थाः :—**


१. कोल्हटकर कृ. के., भारतीयमानसशास्त्र अथवा सार्थ आणि सविवरण पातञ्जलयोगदर्शनम्, आदित्यप्रतिष्ठानम्–पुणे, (२०१४)
२. शर्मा नत्थुरामः, श्रीपातञ्जलयोगदर्शनम्, (रहस्यदीपिकाटीकासहिता), आनन्दाश्रमः-बिलखा (१९९९)
३. शर्मा रघुनाथः (सम्पादकः), वाक्यपदीयम् (तृतीयं काण्डम्, द्वितीयो भागः), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः–वाराणसी (१९९७)
४. शुक्ल जे. एम., वाक्यपदीयम्, गुर्जरभाषानुवादटिप्पणीसहितम्, लालभाई दल्पतभाई भारतीयसंस्कृति विद्यामन्दिरम्-कर्णावती


✦✦✦✦✦✦✦✦✦✦✦✦

१५. वाक्यपदीयम्-३.७.१७३



Scanned with CamScanner